संस्कृतवार्ता:
15.07.2024
सायम् - 06:20

मुख्यवार्ता:

· भारतेन मार्शलद्वीपैः सह चतसृणां सामुदायिकविकासपरियोजनानां क्रियान्वयनार्थं ज्ञापनपत्रे हस्ताक्षराणि विहितानि।

· श्री केपीशर्मा-ओली-वर्यः चतुर्थवारं नेपालस्य प्रधान-मन्त्रित्वेन शपथवचनं स्वीकृतवान्।

· गृह-मन्त्रिणा अमितशाहेन अद्य असम-गुजरातोत्तर-प्रदेश-राज्याणां मुख्यमन्त्रिभिः सह सम्वादः कृतः सहैव राज्येषु जलप्लवस्य स्थितिः समीक्षिता।

· मियामीनगरस्य हार्डरॉक्-क्रीडाङ्गणे कोलम्बिया-देशं एकम् शून्यम् इत्यन्तरालेन पराजित्य अर्जेण्टिना-देशः क्रमशः द्वितीयं कोपा-अमेरिका-चैम्पियनशिप् इति प्रतियोगितां जितवान्।

विदेशमन्त्री डॉ. एस जयशंकरः
विदेशमन्त्री डॉ. एस जयशंकरः अद्य अवदत् यत् भारतस्य मार्शलद्वीपस्य च मैत्रीपूर्णद्विपक्षीयसम्बन्धस्य दीर्घः इतिहासः अस्ति यस्य विस्तारः वर्षैः नितरां जायते। मार्शलद्वीपेषु चतसृणां सामुदायिकविकासपरियोजनानां क्रियान्वयनार्थं ज्ञापनपत्रे हस्ताक्षरस्य अवसरे भाषमाणः डॉ. जयशंकरः अवदत् यत् प्रशान्तसागरे ये द्वीपाः सन्ति ते लघुद्वीपाः न अपितु बृहत्समुद्रदेशाः सन्ति। सः अवदत् यत् प्रशान्तद्वीपानां स्थायिविकासस्य अन्वेषणे तेषां समर्थनं भारतं दायित्वं मन्यते। सः एवमपि अवदत् यत् ऋतुपरिवर्तनम्, प्राकृतिकविपदः, दरिद्रतानिवारणम्, स्वास्थ्यसेवा च सामान्यानि आव्हानानि सन्ति, येषां समाधानं भारतेन मार्शलद्वीपेन च मिलित्वा करणीयम्। अस्मिन् विषये प्रशान्तद्वीपानां सहयोगित्वं भारतस्य सौभाग्यं वर्तते इति तेन प्रतिपादितम्।

नेपालः-शपथग्रहणम्
श्री केपीशर्मा-ओली-वर्यः चतुर्थवारं नेपालस्य प्रधान-मन्त्रित्वेन शपथवचनं स्वीकृतवान्। राष्ट्रपतिना रामचन्द्र-पौडेल-वर्येण अद्य राष्ट्रपति-भवनस्य मुख्यभवने, शीतलनिवासे श्रीओलि-वर्याय पदस्य गोपनीयतायाः च शपथवचनं ग्राहितम् सहैव राष्ट्रपतिना नवनियुक्तेभ्यः एकविंशति-

मन्त्रिभ्यः अपि पद-गोपनीयतयोः शपथवाचनं ग्राहितम् । ओलिवर्यस्य नेतृत्वभूते मन्त्रिमण्डले अधुना एनसी, यूएमएल, जनता-समाजवादी-पार्टी, लोकतान्त्रिक-समाजवादी-पार्टी इत्येतेषां दलानाम् अपि मन्त्रिणः सम्मिलिताः सन्ति। नेपाल-कांग्रेस्-दलस्य प्रकाश-मान-सिंहः ,सीपीएन-यूएमएल-दलस्य बिष्णु-प्रसाद-पौडेलश्च उप-प्रधान-मन्त्रिणौ चितौ ।

अमितशाहः-जलाप्लवप्रभावितराज्याणि

गृह-मन्त्रिणा अमितशाहेन अद्य असम-गुजरातोत्तर-प्रदेश-राज्याणां मुख्यमन्त्रिभिः सह सम्वादः कृतः सहैव राज्येषु जलाप्लवस्य स्थितिः समीक्षिता । श्रीशाहेन एतेषु राज्येषु जलस्तरवृद्धिविषयिकी सूचना गृहीता सहैव तेन राज्येभ्यः यथासम्भवं साहाय्यम् उपलब्धं कारयितुम् आश्वासनं प्रदत्तम् ।

ओडिशा-बहुदायात्रा:

भगवतः जगन्नाथस्य, तस्याग्रजस्य भगवतः बलभद्रस्य , तस्य भगिन्याः भगवत्याः सुभद्रायाः भगवतः सुदाशनस्य च विश्व-प्रसिद्धः बहुदा-यात्रोत्सवः अद्य ओडिशायाः पवित्र-नगरे पुर्य्याम् समायोज्यते । अद्य प्रातरारभ्य एव लक्षाधिकाः श्रद्धालवः भगवतः आशीर्वचांसि समावाप्तुं, बहुदा-यात्रां च द्रष्टुं पुर्य्यां समागताः सन्ति । अवधेयं यत् इयं यात्रा भगवतः जगन्नाथस्य तस्य भ्रातृ-भगिनीनां च गुंडिचा-देवालयात् श्री-मन्दिरं प्रति प्रत्यागमनस्य प्रतीकत्वेन आयोज्यते।

ट्रम्पः-हत्याप्रयासः

संयुक्त-राज्य-अमेरिकायाः राष्ट्रपतिना जो-बाइडेन इत्यनेन , तस्य रिपब्लिकन-दलस्य प्रतिद्वन्द्विना डोनाल्ड-ट्रम्पः इत्यनेन च अमेरिकायाः नागरिकाः संघटिताः भूत्वा राजनीतिक-विभाजनोन्मूलनं कर्तुं समाहूताः । श्री-ट्रम्पः अकथयत् यत् रिपब्लिकन-राष्ट्रिय-सम्मेलने तस्य आगामि-भाषणं राष्ट्रपति-बाइडेनस्य आलोचनां विहाय राष्ट्रियैक्यं इति विषये केन्द्रितं भविष्यति। राष्ट्रपतिना जो-बाइडनेन पेंसिल्वेनियायाः जनसभायां सुरक्षोपायानाम् एकं स्वतंत्र-मूल्याङ्कनम् अपि समारब्धम् यत्र पूर्व-राष्ट्रपतिनः डोनाल्ड-ट्रम्पस्य हत्याप्रयासः कृतः आसीत् । श्री-ट्रम्पः गुरुवासरे रिपब्लिकन-पार्टीति दलस्य राष्ट्रिय-सम्मेलनं सम्बोधयिष्यति ।

ऋतुविज्ञानविभागः

ऋतु-विज्ञान-विभागेन अद्य उत्तराखण्डस्य, पूर्वीयोत्तर-प्रदेशस्य पूर्वीय-राजस्थानस्य च विभिन्नक्षेत्रेषु वृष्टेः सम्भावना प्रकटिता । ऋतु-विज्ञान-विभागेन अद्य हरियाणा-उत्तर-प्रदेश-राज्ययोः दिल्ली-नगरस्य च केषुचित् क्षेत्रेषु झञ्झावातेन सह मध्यम-वृष्टेः अनुमानं प्रकटितम् ।

कौशलविकास-उद्यम-मन्त्री जयन्तचौधरी

कौशलविकास-उद्यम-मन्त्री जयन्तचौधरी इत्यनेन उक्तं यत् 'कौशलभारतयोजनायाः' अन्तर्गतं अद्यप्रभृति षट्चत्वारिंशद्लक्षोत्तरैककोटितो अपि अधिकाः जनाः कौशलप्रशिक्षणं प्राप्तवन्तः। अद्य नवदिल्लीनगरे विश्वयुवकौशलदिवसस्य कार्यक्रमं सम्बोधयन् श्रीचौधरीः अवदत् यत्, भारतस्य कौशलविकासस्य उद्यमशीलतायाश्च क्षेत्रे इयं काचित् विशेषयात्रा अस्ति यतो हि दश वर्षाणि पूर्वमेव पृथक् मन्त्रालयस्य सङ्घटनं जातम्। सः अवदत्, विगतदशवर्षैः प्राप्ताभ्यः उपलब्धिभ्यः प्राप्तानुभवेन मन्त्रालयः इतोपि अधिकाः समावेशि- योजनाः क्रियान्विताः करिष्यति याभिः सप्तचत्वारिंशदुत्तरद्विसहस्रतमं वर्षं यावत् अयं विकसितराष्ट्ररूपेण भारतस्य यात्रायां योगदानं दातुं शक्नुयात्। अस्मिन् अवसरे श्री चौधरी कौशलविकासप्रशिक्षणं कृतवद्भिः युवभिः सह संवादं कृतवान्, प्रशिक्षकान् अपि अभिनन्दितवान्।

भारतीयकृषिसंशोधनपरिषद्

भारतीयकृषिसंशोधनपरिषदः (ICAR) द्विदिनात्मकः स्थापना-प्रौद्योगिकीदिवसः अद्य नवीदिल्लीनगरे आरब्धः। अद्य प्रथमदिने विद्यालयस्य छात्राः कृषिविषये, तत्सम्बद्धप्रौद्योगिकीविषये च ज्ञानं प्राप्तुं आमन्त्रिताः आसन्। अस्मिन् अवसरे कृषि-नवीनता-प्रौद्योगिकीनां आधारेण आयोजितां प्रदर्शनीम् अपि छात्राः दृष्टवन्तः।

लद्दाखम्

लद्दाखनगरे ह्यः द्रासनगरस्य कारगिलयुद्धस्मारकस्थाने संसत्कार्याणाम् अल्पसंख्यककार्याणां च केन्द्रीयमन्त्री किरण रिजिजुः ऑपरेशनविजय इत्यस्य वीरसैनिकेभ्यः हार्दिकश्रद्धांजलिम् अयच्छत्। अस्मिन्नवसरे श्रीरिजिजुः नवनवत्युत्तरनवदशशततमे वर्षे कारगिलयुद्धे भारतीयसैनिकैः कृतस्य त्यागस्य स्मरणं कृतम् , सममेव सेनाकर्मचारिभिः सह संवादं कृतवान्, तेषां समर्पणस्य सेवायाः च गहन-प्रशंसाम्, कृतज्ञतां च प्रकटितवान्। एतेषां राष्ट्रनायकानां सम्मानस्य महत्त्वं बोधयन् श्रीरिजिजुः अवदत् यत्, "तेषां दत्तैः प्राणैः, राष्ट्रं शान्तिपूर्वकं विद्यते ।

अतः भारतस्य वीरेभ्यः श्रद्धाञ्जलिं दातुं प्रत्येकं भारतीयः स्वजीवने एकवारम् अत्र आगच्छेत् ” इति

<u>वृष्टिः</u>

अद्य दक्षिण-गुजरातस्य सूरत-भरूच-नर्मदा-जनपदानां केषुचित् भागेषु भीषणवृष्टिरभवत्। विगते होराद्वये सूरतस्य उमरपाड़ा-क्षेत्रे दश-इंच-परिमिता सर्वाधिका वृष्टिः सञ्जाता । गरुड़ेश्वर, टीकलवाड़ा, नटरंग-क्षेत्रेषु अपि प्रभातकाले अतिवृष्टिरभवत्। राज्ये अधुना पर्यन्तं अनुमानितायाः वृष्ट्याः उनत्रिंशद्दशमलव-अष्टचत्वारिंशन्मिता वृष्टिः सञ्जाता अस्ति यद्यपि सौराष्ट्रे, दक्षिणगुजराते कच्छ-क्षेत्रे च त्रिंशत्प्रतिशन्मिता वृष्टिः अभवत्। अस्मिन्मध्ये ऋतुविज्ञानविभागेन आगामिदिवसेषु दक्षिणगुजरातस्य विभिन्नक्षेत्रेषु अतिवृष्टिः , मध्योत्तर-गुजरात-क्षेत्रेषु च भीषणवृष्टिः अनुमानिता अस्ति । महाराष्ट्रे विगतदिवसात् मध्यमातिवृष्टिर्भवति । प्राप्तसूचनानुसारं रायगढ-रत्नागिरी-जलगांव-औरंगाबाद-जालना-जनपदानि अधिकृत्य झञ्झावातस्य भीषणवृष्टेः रेड-अलर्ट इति रक्तवार्णिकी सञ्चेतना प्रसारिता अस्ति।

<u>अर्जेण्टिनाविजयः</u>

अद्य प्रातःकाले मियामीनगरस्य हार्डरॉक्-क्रीडाङ्गणे कोलम्बिया-देशं एकम् शून्यम् इत्यन्तरालेन पराजित्य अर्जेण्टिना-देशः क्रमशः द्वितीयं कोपा-अमेरिका-चैम्पियनशिप् इति प्रतियोगितां जितवान्।

।। इति वार्ता: ।।